## अभ्यासः



**1. (क) उच्चारणं कुरुत।**

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् | आवाम् | अस्मान् |
| मम | आवयोः | अस्माकम् |
| त्वम् | युवाम् | यूयम् |
| त्वाम् | युवाम् | युष्मान् |
| तव | युवयोः | युष्माकम् |

K Sharma

4. क्रियापदैः वाक्यानि पूरयत –

| | | | | | |
|---|---|---|---|---|---|
| पठसि | धावामः | गच्छावः | क्रीडथः | लिखामि | पश्यथ |

यथा– अहं पठामि।

क. त्वं पठसि।

K.Sharma

ख. आवां गच्छावः।

ग. यूयं पश्यथ।

घ. अहं लिखामि।

ङ. युवां क्रीडथः।

च. वयं धावामः।



3. कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत –

| | |
|---|---|
| क. अहं पठामि। | (वयम् / अहम्) |
| ख. युवां गच्छथः | (युवाम् / यूयम्) |
| ग. एतत् मम पुस्तकम्। | (माम् / मम) |
| घ. युष्माकं क्रीडनकानि। | (युष्मान् / युष्माकम्) |
| ङ. आवां छात्रे स्वः। | (वयम् / आवाम्) |
| च. एषा तव लेखनी। | (तव / त्वाम्) |

K.Sharma



**2. निर्देशानुसारं परिवर्तनं कुरुत –**

| | | |
|---|---|---|
| यथा– अहम् पठामि | (बहुवचने) | – वयं पठामः। |
| क. अहं नृत्यामि। | (बहुवचने) | – वयं नृत्यामः। |
| ख. त्वं पठसि। | (बहुवचने) | – यूयं पठथ। |
| ग. युवां क्रीडथः। | (एकवचने) | – त्वं क्रीडसि। |
| घ. आवां गच्छावः। | (बहुवचने) | – वयं गच्छामः। |
| ङ. अस्माकं पुस्तकानि। | (एकवचने) | – मम पुस्तकम्। |
| च. तव गृहम्। | (द्विवचने) | – युवयोः गृहे। |

K.Sharma

**5. उचितपदैः वाक्यनिर्माणं कुरुत-**

| | | | | | |
|---|---|---|---|---|---|
| मम | तव | आवयोः | युवयोः | अस्माकम् | युष्माकम् |

यथा- एषा मम पुस्तिका।

क. एतत् मम गृहम्।

ख. आवयोः मैत्री दृढा।

ग. एषः तव विद्यालयः।

घ. एषा युवयोः अध्यापिका।

ङ. भारतम् अस्माकं देशः।

च. एतानि युष्माकं पुस्तकानि।

K Sharma

6. एकवचनपदस्य बहुवचनपदं, बहुवचनपदस्य एकवचनपदं च लिखत –

| | | |
|---|---|---|
| यथा- | एषः | एते |
| (क) | सः | ते |
| (ख) | ताः | सा |
| (ग) | एताः | एषा |
| (घ) | त्वम् | यूयम् |
| (ङ) | अस्माकम् | मम |
| (च) | तव | युष्माकम् |
| (छ) | एतानि | एतत् |

K.Sharma

7. (क) वार्तालापे रिक्तस्थानानि पूरयत –

यथा – प्रियंवदा – शकुन्तले! त्वं किं करोषि ?

शकुन्तला – प्रियंवदे ! अहं नृत्यामि, त्वं किं करोषि ?

प्रियंवदा – शकुन्तले! अहं गायामि। किं त्वं न गायसि ?

K Sharma

शकुन्तला – प्रियंवदे! अहं न गायामि। अहं तु नृत्यामि।

प्रियंवदा – शकुन्तले! किं तव माता नृत्यति ?

शकुन्तला – आम्, मम माता अपि नृत्यति।

प्रियंवदा – साधु , आवां चलावः।



## (ख) उपयुक्तेन अर्थेन सह योजयत –

| शब्दः | अर्थः |
|---|---|
| सा | वह (स्त्रीलिंग) |
| तानि | वे (नपुंसकलिंग) |
| अस्माकम् | हमारा |
| यूयम् | तुम सब |
| आवाम् | हम दोनों |
| मम | मेरा |
| युवयोः | तुम दोनों का |
| तव | तुम्हारा |

K.Sharma

